This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय ग्रंथालय

हस्तलिखित संग्रह

दाखल क्र. M-2164 विषय _____

नांव मुल्याध्याय MSS

लेखक / लिपीकार कात्यायनकृत

पृष्ठ 6 काळ _____ पूर्ण / ~~अपूर्ण~~

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M 2164

श्रीगणेशायनमः अथमूल्याध्यायोनिरूप्यते द्वात्रिंशत्सणिकागवश्चतुष्कार्षापणोवरः वृषेषट्का
र्षापणकाश्चाष्टावनुड्वहिस्मृताः दशकार्षापणाधेनोरश्वेपंचशदश्वोत्तु हिरण्यकार्षापणकाःपणा
नवतथाधिकाः वस्त्रेकार्षापणश्छागोऽष्टोपणाद्वादशाविके वृषस्यामथपंचाशन्मूल्यंकार्षाप
णास्मृताः निष्केपंचाशदेवस्याद्गजेपंचशतानितु पंचकार्षापणाःप्रोक्तादोत्ताद्यांषडुधेनथा।
गृहेःष्टौकार्षापणकास्तात्रकर्षपणस्मृतः तात्रकर्षपणस्यनइतिमूल्यप्रकल्पना ७ अधिकंकृत्य
येन्मूल्यंन्यूनंचित्तानुसारतः इतिमूल्यंरशिनाविधेयेनावश्यकदानेमुख्यासंभवेसाद्य अथमोयंपक्षः
सन्निवित्तेनाश्रयणीयः ७ निष्काःपंचचदातव्याधेनोःपंचपुराणिकाः धेनोरभावेदातव्यंतुल्यंम्
ल्यंनसंशयः निष्कनिष्कार्द्धपादांतरर्धार्धमथापिवा तुरीयांशस्तुदातव्यःपंचकार्षापणानिवा त्र
यःकार्षापणायद्वारक्तितोमूल्यकल्पना ७ निष्केहीनारः हीनास्तुभवेत्कर्षैःशतैःकार्षापणैस्तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीनारोरौप्यकैरष्टाविंशत्यापरिकीर्त्तितः सुवर्णस्सप्ततितमोभागोरौप्यकइष्यते कलकलः पं
चतेमाषास्तेसुवर्णास्तुषोडश षोडशभागोमाषः कर्षःसुवर्णस्यसुवर्णः षोडशापणःपुराणः पणो
भवेत् काकिनीचतुष्केण पंचाशतेश्चतुर्भिर्वराटकैःकाकिनीचैका वराटकानांदशकद्वयंयत्ना
काकिनीतामपणास्यतत्रः तेषोडशद्रम्मइहावगम्योद्रम्मैस्तथाषोडशाभिस्तुनिष्कः मनुरपि
ह्येकस्तलेसमधृतेविज्ञेयोरूप्यमाषकः तेषोडशस्याद्धरणंपुराणश्चैवराजतः धरणाश्चद
राज्ञेयाःशतमानस्तुराजतः चतुःसौवर्णिकोनिष्कोविज्ञेयस्तुप्रमाणतः इतिमूल्याध्यायः

मूल्याध्यायभाष्यम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूल्याध्याय भाष्यम्

मूल्याध्यायभाष्यम् जीवानंदकृत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ श्रीगणेशायनमः श्रीगोपालंगोपगोपीपरीतंनत्वासम्यक्कुरुस्तुजीवदेवान् मूल्याध्या १
येभाष्यमेतद्विधत्तेगोपालःश्रीयाज्ञिकानांहितार्थं १ तत्रादावाचार्याअभ्यर्हि तत्रास
र्वयागग्रहेयत्वाच्चगोमूल्यमेवचदेति द्वात्रिंशत्सणिकागावइति द्वांभ्यामधिकत्रिंशद्वा
त्रिंशत्सणगूल्यमिति पणस्वरूपंपंचधा वराटकमानेन ताम्रमानेन रोप्यमा
नेन सुवर्णमानेन रजतमानेनेतिभेदात् तत्राधसुक्तंलीलावतां वराटकानांदशकद्वयंप
लाकाकिणीताश्चपणश्चतस्रइति विंशतिकपर्दिकाभिःकाकिनी चतुःकाकिनीभिः
पणइतिअर्थः अशीतिकपर्दात्मकइतियावत् मदनरत्नेच षोडशपणःपुराणः पणोभ
वेत्काकिनीचतुष्केण पंचाशतेश्चतुर्भिर्वराटकैःकाकिनीचेयति एवमशीतिवराटकपरिमि
तःप्रथमःपणइति १ अथताम्रमानेनोक्तमत्रैव यथा ताम्रकर्षःपणःस्मृतइति मनुरपि ॥ १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नात्रिकः कार्षिकः पण इति याज्ञवल्क्येनापि कार्षिकस्तात्रिकः पण इति कर्षपरि
मितताम्रपरिमाणस्यार्थः रहस्यमिस्तु किंचिद्विशेषमाह ताम्रकर्षकलासुत्राचिक्षया
कार्षिकः पण इति तत्रकर्षपरिमाणमाहमनुः जालांतरगतेभानौयत्सूक्ष्मंदृश्यतेरजः
प्रथमंतत्प्रमाणानांत्रसरेणुः प्रचक्षते त्रसरेणवोऽष्टौविज्ञेयालीक्षातुपरिमाणतः तारा जास
र्षपस्त्रिस्तत्त्रयोगौरसर्षपः सर्षपःकृष्णलोमध्यस्त्रियवस्तेकृष्णलः पंचकृष्णलकोमा
षस्तेसुवर्णस्तुषोडश पलंसुवर्णाश्चत्वारः पलानांधरणंदशेति अस्यार्थः गवाक्षादिविकरं
त्रविष्टस्यतेजोंतर्दृश्यमानंरजस्त्रसरेणुरित्युच्यते तैस्त्रिभिर्लीक्षा लीक्षात्रयंराजसर्षपोनाम
राजिका तत्रयंगौरसर्षपः तत्सप्तकंमध्योयवः यवत्रयंकृष्णलः तत्पंचकंमाषः षोडशमा
षैःसुवर्णः चतुःसुवर्णैःपलं दशपलैर्धरणं एवंप्रमाणसिद्धस्यसुवर्णस्यद्वितीयासंज्ञाकर्षइति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पलंकर्षचतुष्टयमिति निबंधोक्तेः दशगुंजंप्रवदंतिमाषंमाषैस्तथाषोडशभिश्चकर्षं कर्षै
श्चतुर्भिश्चपलंतुलाज्ञाः कर्षसुवर्णस्यसुवर्णसंज्ञमितिलीलावत्युक्तेश्च एवंकर्षसुवर्णयोर्यु
जाछ्छलयोश्चाभेदः यद्यपिलीलावत्यां तुल्यायवाभ्यांकथितावगुंजेत्यत्रयवद्वयेनोक्ताऽत्रतु
मध्यमयवत्रयेणोक्तत्वात् तत्रगुरुत्वयवद्वयंबोध्यमित्यदोषः तेनकर्षपरिमितेताम्रेपिपणोभवतीत्य
र्थद्वितीयः तथाचैवाग्रेवराटकताम्रकार्षापणावुक्तौ रौप्येविंशतिमाषप्रमितराजतेचकार्षापि
णस्यवक्ष्यमाणत्वात् षोडशोत्थयवाः संमितिर्येमाद्रे कार्षापणंप्रकृत्योक्तत्वादर्थात्कार्षापणस्य
षोडशोंशःपणोभवतीतिज्ञायते तेनरौप्यस्यकिंचिन्न्यूनगोरसर्षपत्रयाधिकोरौप्यैकःपणस्तथा
यः तथाविंशतिमाषप्रमितसुवर्णस्यसुवर्णकार्षापणस्तेनवक्ष्यमाणस्यषोडशांशःसपादैकमाषा
त्मकःसुवर्णःपणश्चतुर्थः तथारजतस्यराजतविंशतिमाषप्रमितत्वेनवक्ष्यमाणषोडशांशाः ॥
सपादराजतमाषात्मकोराजतःपणःपंचमः ५ राजतमाषस्वरूपमुक्तंहेमाद्रौ द्वेकृष्णलेसमधृते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विज्ञेयो रूप्यमाषकइति एवंवराटकमानेनैकस्यागोर्मूल्यं षष्ट्यधिकपंचविंशतिशतीवराटका
नांभवति ताम्रमानेनैकस्यागोर्मूल्यमष्टसुद्रांकितषष्टकस्यचतुर्भवत्वारिंशदधिकशतमुद्राल्लकसं
ख्यंकिंचिन्यूनाष्टशतवराटकाभवंति रौप्यमानेनतुरैकस्यागोर्मूल्यंकिंचिन्न्यूनैकयवाधिकगुंजाद्वय
परिमितंसुवर्णंभवति सुवर्णमानेनत्वेकस्यागोर्मूल्यंचत्वारिंशन्माषकप्रमितंसुवर्णंभवति ॥
रजतमानेनतुरैकस्यागोर्मूल्यंराजतचत्वारिंशन्माषकप्रमितंरजतंभवति एवंपंचपक्षाउक्ताः ५
अन्येस्मृत्यंतरोक्ताःपक्षाःविभवानुसारेणकर्मापेक्षयावाग्राह्याः यथाब्रह्मपुराणे गवामभावेनिष्क
स्यात्तदर्धंपादएवचेत्स्यादधः अत्रनिष्कपरिमाणंतुरूप्यपरिमाणपरिभाषायांयाज्ञवल्क्येनोक्तं
निष्कसुवर्णाश्चत्वारइति चतुःसुवर्णसमतोलितंरूप्यनिष्कइत्यर्थः यद्यावराटकमानेनपणेसिद्धे
तेषोडशकर्म्मशतावगव्योरभेस्तथाषोडशाभिभ्रकर्षइतिस्मृत्यवस्थकल्पितः ननुरैकस्यागोर्मूल्यं

निष्क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्तमः अशीतिपुक्ताशतचतुष्टयसुक्तविंशतिसहस्रावराटकाभवंति मध्यमेतु चत्वारिंशाधुक्तशत
द्वयाधिकदशसहस्रावराटकाभवंति अधमेतु विंशतिसुक्तशताधिकपंचसहस्रावराटकाभवंतीसलं ७
॥ ॥अथवस्तूल्यमाह॥ ॥चतुःकार्षापणोवरइति चत्वारःकार्षापणाःमूल्यंयस्येति तत्रकार्षापण
मानमपिपंचधोक्तं वराटकमानंताम्रमानंरौप्यमानंसुवर्णमानंरजतमानंभेदात् तत्रवराटकमानेन
तावद्धेमाद्रौमदनरत्नेचपणेर्निबंधः सर्वस्यांषोडशैवपणाःसंहितियुक्तेः षोडशपणानामशीत्यधिक
द्वादशवातीवराटकानांकार्षापणोभवतीत्यंप्रथमः १ ताम्रमानेनतुषोडशपणानांकिंचिन्यूनंमदु
मुद्रांकितटङ्कानांकार्षापणोयंद्वितीयः २ रौप्यमानेनतुकार्षापणोदक्षिणस्यांदिशिरौप्येप्रवर्त्तत
इतिहेमाद्रौनारदोक्तेः रौप्यमाणसुवर्णकार्षापणोयंतृतीयः ३ रौप्यलक्षणंहेमाद्रौ सुवर्णसप्ततिभ
र्भागोरूप्यकइष्यतइतेः किंचिन्यूनसप्तवर्णयाधिकैकगुंजामात्रंसुवर्णंरौप्यकस्तत्रापिकार्षाप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णश्चोभवतीत्यर्थः सुवर्णमानेनतुमाषोविंशतिभागश्चज्ञेयः कार्षापणःसचिंतिहेमाद्रौकात्या
यनोक्तेः विंशतिमाषप्रमितेसुवर्णेकार्षापणोयंचतुर्थः ४ अत्रविंशोपक्षेपेविंशतिरूप्यमाष
प्रमितरूप्येपिकार्षापणोभवतीत्ययंपंचमः ५ अत्रअन्यपुराणेकार्षापणोनामभेदः अत्रच
राटकमानेनवराटकमूल्यंविंशतियुक्तवातेकाधिकपंचसहस्रावराटकाभवंति ताम्रमानेनतु
किंचिन्न्यूनषट्विंशद्वृद्धकाभवंति रौप्यकमानेनतुकिंचिन्न्यूनयवद्वयाधिकचतुर्गुंजामानं
सुवर्णभवति सुवर्णमानेनेतुपंचरूक्षवर्णाभवंति रजतमानेनतुरजतानशीतिमाषकपरिमितंर
जतंभवति एतेषामपिपक्षाणांरात्यपेक्षयाकर्मापेक्षयाचाव्यवस्थाबोध्या ७ अथवसूस्यमाह
वृषेषट्कार्षापणाकाइति वृषोनामबलोत्पादनसामर्थ्योस्पृष्टधुरः तस्यषट्कार्षापणकामूल्यंभव
ति तत्रवराटकमानेनतन्मूल्यंअशीतियुक्तषट्शताधिकसप्तसहस्रावराटकाभवंति १ ताम्रमाने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ वलुकिंचिन्न्यूनचनुः पंचाशद्वटूका भवंति २ रौप्यमानेनतुकिंचिन्न्यूनसप्तगुंजाप्रमाणंसुव ४
र्णं भवति ३ सुवर्णमानेनतुसार्द्धंसप्तसुवर्णा भवंति ४ रजतमानेनतुविंशतिरजतमाषाधिकश
तमाषरूप्यंभवतीत्यर्थः ७ ॥अथानुडुन्मूल्यमाह॥ अष्टाचनुडुहिस्मृताइतिकार्षापणका
स्तत्रवर्त्तते तेचानुडुहोष्टौमूल्यंभवंति अनुडुहनामग्रजीसादनेपूर्वहनेचसमर्थः अत्रसर्व
त्रापिषाणांवरापेक्षयाक्रमतोद्वैगुण्यंबोध्यं वराटकां१०२४० ताम्रमानेनवटूकाः७२ रौप्यमानेनष
ट्चतुष्टयाधिकंगुंजाषट्कंसुवर्णं सुवर्णमानेनमाषाः१६० रजतमानेनरजतमाषाः १६० ७ ७
अथधेनुमूल्यमाह दशकार्षापणाधेनोरिति धेतुर्नामवत्सप्रचुरदुग्धयुक्तागोस्तस्यादशकार्षाप
णामूल्यं अत्रवराटकमानेनाष्टशतसहस्राधिकत्वादशसहस्रावराटकाभवंति१२८०० ताम्रमानेनकिं
चिन्न्यूननवतिवटूकाभवंति रौप्यमानेनषडधिकगुंजादशमितंसुवर्णं धेनोर्मूल्यं सुवर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानेनसार्द्धद्वादशसुवर्णाभवंति रूप्यमानेनतुराजतशतत्रयंमाषकाभवंति ७ अथाश्व
मूल्यमाह अश्वेपंचदशोरहीतिधेन्वपेक्षयाक्रमेणबोध्यं वराटकमानेनवराटकाः१५२०० ता
म्रमानेनद्वयूकाः१३५रौप्यमानेनषष्ठ्यधिकमाषत्रयं सुवर्णमानेनपादोनैकोनविंशतिसु पंचदशी
वर्णाः रौप्यमानेनराजतमाषाणांशतत्रयं ७ अथहिरण्यमूल्यमाह हिरण्येकार्षापणाकः
पणानवतथाधिकाइति नवपणाधिकैकैककार्षापणइत्यर्थः अत्रवराटकमानेनैकस्यहिरण्य
स्यसहस्रत्रयंवराटकाभवंति ताम्रमानेनचाष्टिगुंजान्यूनंचतुर्स्त्राद्वयूकाभवंति रौप्यमा
नेनकिंचिन्न्यूनसार्द्धषट्पंचकप्रमाणंसुवर्णंभवति सुवर्णमानेनसपादैकविंशत्याषा
भवंति राजतमानेनसपादैकविंशद्राजतमाषाभवंति ७ अथवस्त्रमूल्यमाह वस्त्रैका
र्षापणइति एकःकार्षापणोवस्त्रमूल्यंभवति अत्रवराटकमानेनाशीत्यधिकद्वादशेति
१२८०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वराटकाभवंति ताम्रमानेनकिंचिन्यूननवठरकाभवंति रौप्यमानेनकिंचिन्यूनसर्षप
यधिकगुंजामात्रंसुवर्णंभवति सुवर्णमानेनविंशतिमाषप्रमितंसुवर्णंभवति रजतमाने
नविंशतिराजतमाषप्रमितंरजतंभवति ७ अथआगमूल्यमाहः आगेष्टोपणाइति
आगेःष्टोपणाभवंति अत्रक्रमेणगोपेक्ष्यायत्मात्रंभवति वराटकमानेनवराटकाः ९०
ताम्रमानेनकिंचिन्यूनेसार्द्धचत्वारोटङ्काः रौप्यमानेनराजिकोत्तरैकसर्षपाधिकसार्द्ध
यवपरिमितंसुवर्णंभवति सुवर्णमानेनदशमाषाः राजतमानेनराजतादशमाषाः अथा
विमूल्यमाह दाश्शाविकइति अविकेदाश्शापणामूल्यंभवति अत्रचक्षापेक्ष्यायाक्रमेणसा
दमधिकंबोध्यं ७ अथदासीमूल्यमाह दासीत्यादिपंचाशन्मूल्यंकार्षापणास्मृताइति
दासीदासीनस्याःपंचाशत्कार्षापणामूल्यंभवति वराटकमानेनवनुःषष्टिसहस्रंवरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकोद्दशतान्रमानेनपंचचत्वारिंशदधिकशतचतुष्टयटङ्काः रौप्यमानेनयवैकाधिकाष्टपंचाशद्गुंजापरिमितंसुवर्णं सुवर्णमानेनसार्द्धद्विषष्टिसुवर्णाः अत्रधेन्वपेक्षया क्रमेणापंचगुणंबोध्यं ७ अथनिष्कमूल्यमाह निष्कोपंचाशद्देवस्यादिति निष्कोभूषणविशेषः तस्यपंचाशत्कार्षापणात्मूल्यंभवति अत्रदासीतुल्यमूल्यंबोध्यं ७ अथगजमूल्यमाह गजेर्पचशतानिचेति गजेहस्तिनिपंचशतानिशतपंचकंमूल्यंभवति अत्रकपर्दिकामानेनचत्वारिंशत्सहस्राधिकलक्षषड्ढंकरटकाभवंति गजमूल्यं ५४०००ताम्रमानेनस्थूलपंचाशदधिकसहस्रचतुष्टयटङ्काभवंति ४४५० रौप्यमानेनयवैकाधिकशतीस्थूलपंचशद्गुंजापरिमितसुवर्णंगजमूल्यंभवति ५८७ सुवर्णमानेनायुतंमाषागजमूल्यंभवति सुवर्णमानेनस्थूलंमाषागजमूल्यंभवति एवंरजतमानेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजतोऽधुनमाषाः ७ अथद्रोलामानमाह पंचकार्षापणाः द्रोक्तादोरलाख्यामिति ॥
द्रोलानरवाहंयानं तत्रपंचकार्षापणामूल्यंभवति अत्रअन्यपेक्षयाऽनुक्रमेणबोध्यं ॥
कार्षापणाः ७ ॥अथरथमूल्यमाह षड्भिर्नथेति यत्षटकमानेनरथमूल्यमरीमिपुत
षट्शताधिकसप्तसहस्रवराटकाः७६८० ताम्रमानेनयत्तुपंचाशत्षट्कार्षाः रौप्यमानेनस
पंचषष्ट्यधिकषट्सुंजाभ्रमितंसुवर्णं सुवर्णमानेनसार्द्धसप्तसुवर्णाः रजतमानेनराजा
तंत्रिंशत्यधिकंमाषशतं रथेषड्भिर्कार्षापणामूल्यंभवति अयंदृषच्चबोध्यः ७ अथगजम
ल्यमाह गजेःद्रोकार्षापणकाइति गजेःद्रोकार्षापणकामूल्यंभवति अत्रानुक्रमेण
बोध्यं ॥ ॥अथपणलक्षणमाह ताम्रकर्षपणाःस्मृताः ताम्रकर्षपणाःस्मृतइति ता
म्रःपणोबोध्यइत्यर्थः अभ्यासोग्रंथसमाप्तिसूचकः इतिकात्यायनकृतमूल्याध्यायेगो
पालकृतविवरणंसमाप्तिमगमत् ७ ७ ७ श्रीरस्तिकार्षापणमस्तु॥ ७ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.09.19 13:56
,TRANSFERRED=2019/09/23 at 14:00:10
,PAGES=17
,TYPE=STD
,NAME=S0001898
,Book Name=M-2164-MULYADHYAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection